CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

## संस्कृतवर्ष-विशेषांकः




संस्कृतवर्षम् युगाब्द 5101 (1999-2000)

नगरे नगरे ग्रामे ग्रामे विलसतु संस्कृत-वाणी।
सदने सदने जन-जन-वदने जयतु चिरं कल्याणी॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दूरभाष–४५४२९५ (ज्वालापुरम्) तारगृहम्–महाविद्यालयः, ज्वालापुरम्


# भारतोदयः

संस्कृत–मासिकपत्रम्

वर्षम्–९० अङ्कः – ४

सम्पादकः

**डा० हरिगोपालशास्त्री**

व्याकरणाचार्यः

एम्०ए०, पी–एच्०डी०

राष्ट्रपति–पुरस्कृतः

सह–सम्पादकः

**डा० केशवप्रसाद उपाध्यायः**

साहित्याचार्यः

एम्०ए०, पी–एच्०डी०

प्रबन्ध–सम्पादकः

**डा० अजयकौशिकः**

एम्०ए०, साहित्याचार्यः

प्रकाशकः

गुरुकुलमहाविद्यालयो ज्वालापुरम्

हरिद्वारम्-२४९४०५ (उ०प्र०)

**शुल्क-विवरणम्**

| | | |
|---|---|---|
| प्रत्यङ्कम् | — | ५/– |
| वार्षिकम् | — | ५०/– |
| आजीवनसस्यता शुल्कम् | — | ५००/– |


# विषयानुक्रमणिका


| | | |
|---|---|---|
| १–श्रुतिसुधा | —महर्षिदयानन्दसरस्वती | ३ |
| २–श्रीलालबहादुरशास्त्री | —डॉ० हरिगोपालशास्त्री | ४ |
| ३–नव प्रहेलिकाः | —श्री रामनाथशास्त्री | ६ |
| ४–प्रेमवती | —डॉ० बलबीरदत्तशास्त्री | ७ |
| ५–सखे ! धन्येयं भारतभूः (गीतम्) | —श्री रामविनयशास्त्री | ९ |
| ६–अध्यास–विवेकेनैव ब्रह्मस्वरूपावधारणम् | —डॉ० रामप्रतापःतिवारी | १० |
| ७–ब्रह्मपुत्रं नमाम्यहम् | —श्री अनन्तराममिश्रः'अनन्तः' | १४ |
| ८–कालिदासस्यायुर्वेदशास्त्रप्रावीण्यम् | —कु० वनज्योत्स्नामिश्रा | १५ |
| ९–दिल्ली संस्कृत अकादमी, दिल्ली सर्वकारस्य विज्ञापनम् (अखिल भारतीय संस्कृत लघु नाटक लेखन प्रतियोगिता १९९९–२०००)..... | | १९ |
| १०–सर्वं पश्यति प्रभुः | —श्रीकृष्णदत्तशर्मा शास्त्री | २० |


## ※ कृष्णं वन्दे जगद्गुरुम् ※


—श्रीदुर्गेशस्वरूपः (द्वारकाप्रसादशास्त्री)

४७५/१, वृन्दावनम्, शाहटोला, रायबरेली (उ०प्र०)


योगमायां समाश्रित्य ह्यवतीर्णं धरातले।
हन्तारं दुष्टदैत्यानां कृष्णं वन्दे जगद्गुरुम् ॥१॥
कारागारे समुत्पन्नं वृद्धं पुष्ट च गोकुले।
जगदानन्ददातारं कृष्णं वन्दे जगद्गुरुम् ॥२॥
देवकीनन्दनं श्रीशं यशोदानन्द–दायकम्।
सर्वकल्याणकर्तारं कृष्णं वन्दे जगद्गुरुम् ॥३॥
नवनीतविलिप्ताङ्गं नवनीतस्य भक्षकम्।
सच्चिदानन्ददातारं कृष्णं वन्दे जगद्गुरुम् ॥४॥
भक्तिभावेन संतुष्टं भक्तकल्याणकारकम्।
स्वभक्तार्तिहरं वन्द्यं कृष्णं वन्दे जगद्गुरुम् ॥५॥
गोपीभिर्वन्दितं नित्यं, गोपीमुक्तिप्रदायकम्।
गोपीनाथं जगन्नाथं कृष्णं वन्दे जगद्गुरुम् ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्वालापुरीय--गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भवभावनाभिलाषी ।
भगवति भुवि भक्ति-भावभाजां भव-भय-भाव-भरं भ्रियान्नभूमन् ॥

× ⋉ ×

निशम्यतां लेखललाम-सञ्चय—प्रकाशने येन कृतोऽतिनिश्चयः ।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः' ॥

वर्षम् - ९० | कार्तिक २०५६ विक्रमाब्दः, अक्टूबर १९९९ ईसवीयाब्दः | अङ्कः - ४

## श्रुति-सुधा

ओ३म् युवानो रुद्रा अजरा अभोग्घनो ववक्षुरध्रिगावः पर्वता इव ।
दृडहा चिद् विश्वा भुवनानि प्रार्थिवा प्र च्यावयन्ति दिव्यानि मज्मना ॥

—ऋग्वेद १/६४/३

पदार्थः — ( युवानः ) मिश्रामिश्रणकर्तृत्वेन बलिष्ठाः । ( रुद्राः ) मरणज्वरादिपीडाहेतुत्वाद् रोदयितारः । ( अजराः ) जन्मजरामृत्युधर्मादिरहितत्वात् कारणरूपेण नित्याः । ( अभोग्घनः ) ये भोज्यन्ते ते भोजः, हन्यन्ते ते हनः, भोजश्च ते हनो भोग्घनः, न भोग्घनोऽभोग्घनः ते । ( ववक्षुः ) वक्षयन्ति रोषयन्ति । ( अध्रिगावः ) अधृता गावो रश्मयो यैः, ते । ( पर्वता इव ) यथा पर्वता मेघाः शैला वा धर्त्तारः सन्ति, तथैव मूर्त्तद्रव्य-धर्त्तारः । ( दृढहा ) दुढानि । ( चित् ) अपि । ( विश्वा ) सर्वाणि । ( भुवनानि ) सर्वेषां पदार्थानामधिकरणानि । ( पार्थिवा ) पृथिवीत्याख्यस्य कारणस्य विकारभूतानि कार्य्याणि । ( प्र ) प्रकृष्टार्थे । ( च्यावयन्ति ) प्रचालयन्ति । ( दिव्यानि ) दिवि प्रकाशे भवानि सूर्य्यविद्युदादीनि । ( मज्मना ) शुद्धिधारणक्षेपणाख्येन बलेन । अत्र मस्जधातो-रौणादिको मनिन् प्रत्ययो, बाहुलकात् सकारलोपश्च । **'मज्मेति बलनामसु पठितम् ।'** ( निघं० २/९ ) । अत्रोपमालङ्कारः ।

भावार्थः — मनुष्यैर्यथा मेघा जलाधिकरणाः शैलाश्चौषध्याद्यधिकरणाः सन्ति, तथैवैते संयोग-वियोगकर्त्तारः सर्वाधाराः सुखदुःखहेतवो नित्या रूपरहिताः स्पर्शवन्तो वायवः सन्तीति वेदितव्यम् । नह्येतैर्विना भूगोल-जलाग्निपुञ्जाश्चैतेषां कणाश्च गन्तुमागन्तुं च शक्नुवन्ति ॥

**—महर्षिदयानन्दसरस्वती**

[ ऋग्वेदभाष्यम्, तृतीयो भागः, १६५ पृष्ठे ]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जन्मजयन्त्युपलक्ष्ये सादरम्

# श्रीलालबहादुरशास्त्री

—डा० हरिगोपालशास्त्री, प्राचार्यः
सम्पादकः भारतोदयस्य च
गुरुकुलमहाविद्यालयो ज्वालापुरम् हरिद्वारम्
२४६४०५ (उ०प्र०)

गवेषणात्मकेन लेखेनानेन संस्कृतसंस्कृति-रक्षणसक्षणविषये पाठक-महानुभावाः परमं तोषम् आवहेयुरिति समीक्ष्य मया भारतस्य पूर्व-प्रधानमन्त्रिणः श्रीमतः लालबहादुरशास्त्रिवर्यस्य व्यक्तित्व—कृतित्व-विषये स्वलेखनी प्रचार्यते। श्रीमतः लालबहादुरशास्त्रिवर्यस्य यथाश्रुतं लेखमाध्यमेन जिज्ञासुषु निवेद्यते। श्रीलाल-बहादुरशास्त्री वेदाकाशग्रहविध्वब्देशवीये (१९०४) अक्टूबरमासे द्वितीयस्मिन् दिनाङ्के

श्री लालबहादुरशास्त्री

वाराणसीमण्डलान्तर्गतते मुगलसरायसंज्ञकपत्तने समुदपद्यत। तस्य पिता शारदाप्रसादः साधारण एव जन आसीत्। न स धनवान् आसीत्, न चोच्चपदे कार्यकर्ता अनैश्वर्यभागेव।

यदा लालबहादुरः स्तनंधयतायामेवावर्तत, श्रीशारदाप्रसादः दिवङ्गतो बभूव। तस्य तदीयो-द्वंयोर्भगिन्योश्च संरक्षणभारस्तन्मातामहेनो-ह्यते स्म। लालबहादुरो वाराणस्यां हरिश्चन्द्र-विद्यालये शिक्षां प्राप्य देशसेवाकार्ये आत्मानं प्रावीवृतत। स महात्मगान्धिप्रवर्तितान्दोलनेऽ-भिरुचिं क्रियात्मकतया पर्यग्रहीत्, तदातनशास-नेन निगतोऽसौ प्राप्तवांश्च वर्षद्वयभोग्यं कारा-वासनिवासदण्डम्। कारागारान्निर्गत्य एकविंश-त्यधिकैकोनविंशतिशततमेशवीये (१९२१) वर्षे स उच्चतरशिक्षालाभाय काशीविद्यापीठ-मन्वगात्। तस्मात् विद्यापीठात् स शास्त्रिपदवीं लब्धवान्। विद्यापीठशिक्षकेषु महादार्शनिकस्य डा० भगवानदासस्य प्रभावस्तमाकृष्टवान्। तस्य देशप्रेमभावनातो बलं लब्धवान्। स पुनः राजनीत्यां सक्रियभागमादातुमुपचक्रमे। भारतसेवकसमाजेऽपि स कार्यमन्वतिष्ठन्। १९२१ तमेशवीयाब्दात् १९४७ तमेशवीयाब्दं यावदजस्रमान्दोलनेषु स आत्मानं प्रावर्तयत्। अष्टकृत्वश्च गौराङ्गशासनेन कारागृहे निक्षिप्तः। निःस्वार्थभावनया कर्तव्यनिष्ठया



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मातृभूमिभक्तिप्रकृष्टतया च सततं भारतसेवाकारितया स जनतायाः श्रद्धाभाजनमभूत्। तस्य व्यक्तित्वं चतुरस्रतया अचकासत। स महात्मगान्धि-जवाहरलालनेहरू—लालालाजपतराय-राजर्षिपुरुषोत्तमदासटण्डन-प्रभृतिनेतृणां सानिध्यात् सोऽतितरामुददीप्यत।

सप्तचत्वारिंशदधिकैकोनविंशतिशततमे—शवीये (१९४७) वर्षे सति स्वतन्त्रे भारते श्रीलालबहादुरशास्त्रिमहाभागः प्रदेशीयशासनकार्यभारमवाक्षीत्, तत्तश्च केन्द्रीयशासने कार्यभारमवहत्। ततद्विभागस्य मन्त्रित्वं स्वीकृत्य देशोन्नतिविधायकानि बहूनि कार्याणि कृतवान्। स्वेन प्रज्ञापाटवेनात्मबलेन च भारतीयानां जनानां विश्वनेतृमण्डलस्य च स्वान्तेषु सम्मानवाप्नोत्।

श्रीलालबहादुरशास्त्री स्वल्पमेव कालं प्रधानमन्त्रित्वकार्यं कर्तुं प्राभवत् परं तस्मिन्नष्टादशमासीयकार्यकलापेन स स्वामनिर्वचनीयामद्भुतां पुनीतपौरुषप्रियतां सर्वहृदयहारिणीं देशभक्तिं च प्रादीदृशत्। स भयानकेभ्यः सङ्कटावर्तेभ्यो देशनावं निःसार्य तां तटे निनाय। तत्र तदलौकिकं नैपुण्यं विलोक्य, तदीयं दिव्यसाफल्यं च प्रेक्ष्य भारतदेशस्यैव जनता न, परं सर्वण्यपि राष्ट्राणि **'भारतस्य भाग्यं वस्तुतः शास्त्रिणः करकमलयोः सर्वथैव सुरक्षितं वर्तते।'** इत्यनुमिमीते स्म। पाकिस्तानेन सार्धं तुमुले संग्रामे यदद्भुतं शौर्यं विपुलसाहसञ्च प्राचीकटत तन्न तदैवापितु सम्प्रत्यपि भारतीय-जनता श्रद्धातिशयेन प्रेक्षते स्म। तत्सर्वमभिवीक्ष्य जनताया मानसं सम्प्रति श्रद्धाप्रणतिप्रवणमभूत्। यादृशं यशः पण्डितजवाहरलालनेहरूमहाभागः अष्टादशवर्षाणि यावद् प्रधानमन्त्रिपदेन नार्जयत्, तादृशं यशः सोऽष्टादशमासकालेनैवार्जयत्। शान्त्यर्थं कृतसङ्कल्पस्यास्याभिप्रायमज्ञात्वा कदाचित् पाकिस्तानदेशो मतिभ्रमं प्राप्तः। स देशः कल्पनामिमां विधातुं नाशकद् यदसौ महात्मगान्धि—जवाहरलालनेहरूभक्तः शान्तिनीतिसमुपासकः सरलहृदयो ह्रस्वपुष्कः पुरुष एतावत्तया कठोरतया पदं निधातुं क्षमः स्यात्। वस्तुतः यावद् वैरिणो मदर्मदनं न क्रियते, तावत् स अन्यथैव विचारयति।

शास्त्रि— महाभागः संयुक्तराष्ट्रसंघस्य महासचिवस्य शान्तिनीतिसमाश्लिष्टामभ्यर्थनामङ्गीकृत्य, न्यगादीत् यत् —'पाकिस्तानदेशो यदीच्छेत्, तदा युद्धविरामो मन्यते। परं तेन पुनराक्रमणे कृते सति अस्माभिः समुचितं तदुत्तरं दातव्यं स्यात्।' शास्त्रिणः एतेन वक्तव्येन पाकिस्तानस्य सर्वोऽपि एतदीयसरलताभ्रमः निवृत्तिमगमत् साकल्येन। शास्त्रिणः दृढसङ्कल्पशीलं पौरुषञ्च सर्वत्र प्रथते स्म।

श्रीलालबहादुरशास्त्री महान् कर्मनिष्ठो बुद्धिमान् लोकदुःखनिराकरणनिहितहृदयः पुरुषप्रवर आसीत्। स दारिद्र्यजनितानि दुःखानि सम्यगवेदीदेव न, अपितु साधारणजनसमवायस्य कास्का दुस्तरा विषमाः स्थितयः सन्तिष्ठन्ते, इत्येतदपि कृत्स्नतया वेत्तिस्म। अतः मन्त्रिणः प्रधानमन्त्रिणो वा पदमपि प्राप्य न स साधुसमुदाचारपथभ्रष्टोऽभवत्, न; चोन्मादप्रमादमयीं स्थितमभजत्। तदीय-जीवनस्य एकैका



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घटी लोकतन्त्ररक्षायां संलग्नाभूत्। जनजीवन-निमित्तेन सुखसमृद्धि-स्वस्थतानाञ्च समुत्पादने संलग्नैव आसीत्। कर्तव्यं प्रति जागरूकतायाः अतः परं किं सन्निदर्शनं दृष्टं स्यात् यद् 'अरियालूर' रेल-दुर्घटनायां स रेलमन्त्रित्व-मेवोदसृजत।

नागानां पाञ्चालप्रदेशवासिनाञ्च समस्यामादाय समुपस्थितं प्रश्नं समाधातुं स यं प्रयासमकार्षीत्, तेन तेषामसन्तोष-समाधानाय वैदेशिकाक्रमणस्य विफलत्वाय शास्त्रिमहोदयेन कृतानां प्रयत्नानां फलमतीवामृतमयमेवासीत्। कर्षकेभ्यः कृष्युपयोगीन्युपकरणानि सुलभीकृत्य तेन कृषिभूमिः शस्यश्यामलिता कारिता तथाक्रमणकारिणां सेनां च पराजित्य भारते विजयवैजयन्ती प्रचारिता।

परमार्थतः शास्त्रिवर्य्यः लोकप्रियो-नेताऽऽसीत्। भारतीयाना यादृशी स्नेहबुद्धिः पूज्यबुद्धिश्च महापुरुषेऽस्मिन् विद्यते, तादृशी बुद्धिरन्येषु विरलेष्वेव भवितुमर्हति। एष एव अस्मदीयः पूज्यो नेता कश्चन अन्यो जातः, यो निर्धनतायामेवोत्पन्नः निर्धनतायामेवो-पारमत। यदाऽन्ये बहवो नेतारः विपुलं धनं समार्जयन्, तदा स भारतमातुः प्रियपुत्रो देश-सेवामेव नैजं सुखम् आत्मसर्वस्वञ्च मन्यते स्म।

हन्त! यदा स नश्वरं शरीरं परित्यज्य दिवङ्गतः, तदा तस्य सकाशे स्वकीयगृहमपि नाभूत्। स महान् आत्मा १९६६ तमेशवदीये वर्षे जनवरीमासस्य ११ तमे दिनाङ्के भौतिकं पिण्डं विहाय परब्रह्मणि विलीनतां गतः। ❁

## ❁ नव प्रहेलिकाः ❁

—श्री रामनाथशास्त्री C/o राजकुमारकौशिक
१५८, जगत् कालोनी, भिवानी (हरियाणा)

हस्तः काष्ठमयः प्रोक्तः पादश्चापि तथैव तु।
प्रहेलिकामाजनानं तं विदुर्बधिरं बुधाः ॥१॥

यस्या नास्त्युदरं क्वापि नान्त्रजातं तथान्तरे।
पातिता शिरसि प्रातः प्राणान् मुखेन कर्षति ॥२॥

गम्भीरोदरकृष्णा च फलके तिष्ठति सौख्यतः।
मुखे दण्डकपातेन समुल्लिखति वर्णकानू ॥३॥

देहः काष्ठं मुखान्यष्ट रूपाकृतिरतिप्रिया।
अजिह्वापि वदेद् वाचं मधुरां श्रुतिसङ्गिनीम् ॥४॥

द्वे मित्रे गृह एकस्मिन् धृतप्रेम्णी मिथोऽपि च।
द्वयोश्च चलनं कार्यमस्मिन् नैपुण्यमावयोः ॥५॥

नीलं विषं भृतं यस्मिन् जिह्वे द्वे कथिते तथा।
न च सर्पः परं दीर्घं उत्तरं देहि सत्वरम् ॥६॥

एकस्याः स्तः शिशू द्वौ तु द्वयोर्वर्णः समानतः।
एको भ्रमेन्न वै तिष्ठेदपरस्तिष्ठेन्नो भ्रमेत् ॥७॥

एकः खगश्चित्रमयोऽपि दृष्टो
य उड्डयेन्नास्त्यपि पक्षपंक्तिः।
सूत्रं सुदीर्घं खलु कण्ठमार्गे
धृत्वाम्बरान्तं परिसेवतेऽपि ॥८॥

चतुष्पादा न गच्छामि विश्रामं ह्यपरांस्तथा।
कुर्वन्त्यपि सदा नित्यं कार्याम्यहमेकला ॥९॥

---

**प्रहेलिकानामुत्तराणि**- १. नौः (नाव), २. कङ्क-तिका (कंघी), ३. मसीत्रावम्, ४. वंशी (बाँसुरी), ५. घटीसूचिके, ६. फाउण्टेन पैन, ७. चक्रिका (चक्की), ८. पतंगः (उड़ने वाली), ९. खट्वा।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करुणकथारूपः उपन्यासः

# प्रेमवती

—डा० बलबीरदत्तशास्त्री
१४६२/१४, फरीदाबाद (हरियाणा)

[ १९९९ अगस्तमासादनुवृत्तम् ]

प्रथमं कष्टमयं जीवनं विस्मारयिष्यामि युवयोः पाणिपीडनं भूयोऽपि सम्पादयिष्यामि। परं पुत्रि ! नैतत्त्वया निगदितं यत्साम्प्रतमस्ति क्व ते पतिः ? नैषा मे समाप्तिं गता पितः कथा। अधुनाप्यस्या अनेकेऽध्याया अवशिष्टाः। अपरा अपि काश्चन वार्ता अस्यां प्रवेष्टुमर्हाः। अहमभागिनी वर्ते पितः। अत्र मम निवसन्त्याः क्रोऽपि दोषस्तु भवन्तं स्प्रक्ष्यति न ? नैव नैव पुत्रि ! यद्यप्यस्त्ययं संसारः शंकालुः। बहवो जिज्ञासवः पृच्छन्ति केयं भवत्सदनेऽवस्थिता युवती काचित् सम्बन्धिनी वर्तते, इयमपि ब्राह्मणी किम् ? इति तदाहमपि आमिति ब्रवीमि।

विमृशामि यदद्य मानुषे नास्ति मानवता, किमावश्यकमेतद्यदात्मनो जातेरेव सेवा विधेया नान्यस्य। अरे इयं जातिस्तु मानवकृता कल्पना वर्त्तते। परमेश्वरेण मानवमात्रस्य निर्मितिविहिता, गुणकर्मस्वभावैरेव मनुष्येषु भवति भेदः। उत्तमकर्मकरणाद् ब्राह्मणो भवति। पौरुषकार्यकृच्च क्षत्रियः सञ्जायते। व्यापारेण पशुपालनेन च वैश्यः सम्पद्यते। सर्ववर्णानां सेवाकरणाय क्षुद्रकर्मभिर्वा शूद्रो जायतेऽस्मिन् मानवसमाजे। किन्तु साम्प्रतं तु समाजस्य परिवर्तनमेवोपपन्नम्।

कश्चन युवा युवत्या साकं तिष्ठति क्वचितं तदा विचारयन्ति जना यदेषोऽस्या पतिरेव भवितुमर्हति। इयमस्य भगिनी अपि भवितुं शक्नोति इति नावधारयन्ति। तथापि पुत्रि ! त्वमिह निःसंकोचमवस्थानं विधेहि। अस्तु, तवास्ति वक्तुमवशिष्टा कथा तद्विरम्यतां रात्रिपरार्धंस्यापि बहुः कालो व्यतीतः। त्रिवादनवेला सञ्जाता। तत्स्वपिहि, सम्प्रति अहमपिप्रातरुत्स्थास्यामि। श्वः समये स्वकार्यसम्पादनं कर्तव्यमस्ति। एतावदुक्त्वा द्राक्तरस्तूष्णीं बभूव, प्रेमवत्यपि स्वशय्यामभिभेजे।

× × ×

द्राक्तरेण तस्यै व्यवस्थापत्रं लिखितं तदनुसारञ्च तया तस्य सेवनमारब्धम्। प्रतिदिनञ्च तस्या व्याधेः प्रशमनमपि शनैः शनैः प्रतीयते स्म। पञ्चदश दिवसेषु तस्याः कण्डूदाहौ नितान्तमुरेमतुः। सा प्रत्यहं भगवत्स्मरणेन साकं द्राक्तरस्यापि गुणानुवादं कुर्वन्ती तदाभारं मेने।

एतदन्तर एवास्याः पत्युः स्थानान्तरणम् उत्तरप्रदेशस्य शामली-नगरे सञ्जातमिति पत्रद्वारा तेन सा सूचिता। अनयापि द्राक्तर-



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समीपावस्थानस्य सङ्केतः प्रहितोऽस्मै ।

एकस्मिन्नहनि च स स्वपत्नीं प्रेमवतीं निजनिकटमानेतुं द्राक्तरस्य गृहमुपपेदे । प्रथमवारमेव सुन्दरसुगठितवपुष्मन्तमेकं युवानं स्वालये समुपस्थितमवलोक्य द्राक्तरो महान्तमानन्दमाप्तवान् । सुस्वादुभिर्भव्यञ्जनैर्मधुरान्नैश्च स्वागतमकरोद् द्राक्तरपत्नी तस्य । महतादरेण चोपहारपूर्वकं तौ दम्पती स्वगेहाद् द्राक्तरेण सपरिवारेण सस्नेहं पुनर्दर्शनदानायाग्रहं कुर्वाणेन विदाकृतौ । भेषजभक्षणमग्रेऽपि कर्तुमादिष्टा च प्रेमवती ।

एकदा हरिद्वारे गंगास्नानयात्रार्थं गच्छता द्राक्तरेणामृतपाल — प्रेमवत्योश्च मध्येमार्गं निमन्त्रणं स्वीकृतमुपयातश्च तत्र तत्समीपम् । तत्रापि रात्रौ वार्तालापे द्वयोः परस्परव्यवहारविषये जिज्ञासा प्रकटिता द्राक्तरेण । तदा प्रेमवत्या स्वपतिसमक्षमेव स्वावहेलनविषये समुद्घाटितं यत्पितः ! 'नायं मम वार्तां मन्यते, स्वस्यैवाग्रहं करोति ।' तदा महता स्नेहेन द्राक्तरेणामृतपालः पृष्टः पुत्र ! कथमस्या दोषं पश्यति भवान् । कथं नास्यै स्निह्यति च । यदि काचिदस्ति त्रुटिरस्या निवेदयतु, अधुनैवाहं दूरीकर्तुमिमामाग्रहीष्यामि । कथं नास्यै प्रददाति भवान् रूप्यकाणि व्ययार्थम् ? किमेषा निरर्थकं व्ययति धनम् ? इयं भवता साकं विवद्धास्ति तर्हि पणकान् कं याचेत ? किमस्या नाधिकारः भवद्वेतने ? इयञ्च बालिका 'पप्पी' किमस्या एवास्ति, न भवतः । पालनपोषण-प्रशिक्षण-विवाहादिकं किमन्यः कश्चिद्विधास्यति, न भवतः कर्तव्यम् ? किमेषा प्रेमवती भवदाज्ञापालनं न कुरुते । यदि भवान् व्याधिग्रस्तो भवेत् तदास्याः कर्तव्यं नास्ति किं सेवाविधानं तथैव च भवतोऽपि, कर्तव्यमिदं यन्न भवता निर्वाहितम् इति बहुशो द्राक्तरेणोपदेशः प्रदत्तः । तेन च लज्जित इवाधोमुखेनैवोत्तरितम्-

पितः ! सत्यं वक्ति भवान् । नाहमस्यै स्वकर्तव्यमकल्पयम् । लज्जामनुभवामि शपथञ्च गृह्णामि नातः परमिमामसुखां विलोकिष्यामि किन्तु सर्वसाधनसम्पन्नां विधास्यामि । सकलञ्च वेतनमस्या एव हस्तयोः समर्पयिष्यामि । न कामपि त्रुटिमल्पतां वा करिष्ये, प्रत्येककार्येषु परामर्शमस्या ग्रहीष्यामि । अपरभूतेन भवता य आत्मभावः प्रदर्शितस्तत्कृते महान्तमाभारं प्रकटयामि, क्षमाञ्च याचे । मदक्षिषु यत्तम आवरणमाच्छादितमासीत् अद्य, भवदुपदेशप्रबोधनेनापाकृतमस्ति तत् । एतावदुक्त्वामृतपालो द्राक्तरचरणौ पस्पर्श । तेनापि द्वयोरेव दम्पत्योः परस्परं पाणिग्रहणमकारि तयोः । ततश्च द्राक्तरेणोदितं यदद्य मे सफलीभूता तपस्या । अहञ्च प्रयामि हरिद्वारे गङ्गास्नानार्थमतो मया सार्धं भवतापि गङ्गास्नानमाचरणीयम् ।

अन्येद्युश्च प्रातराह्निककृत्यादिसम्पानार्थं यदा तौ तेन प्रबोधितौ, तदा स अकथयत् पिताश्री ! अहन्तु गमनेऽसमर्थोऽवकाशाभावेन । तदियं नूनं भवतासाकं प्रयास्यति, परावर्तनकाले चात्रैवायातुभवानपि । मार्गे प्रचुरं प्रमोदमाप्तवती प्रेमवती न्यगादीच्च— 'कैः शब्दैः कृत्यैश्च भवत्साधुवादं कर्तुं शक्नोमि पितः ! । बहोःकालादागतमिदं कालुष्यं भवता धौतमावयोः रोगश्चापनीतः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततश्चामृतपालः स्थानान्तरणे चण्डीगढ-सकाशेचण्डीमन्दिरस्थितस्य सैनिकशिविरेऽगच्छत्। तेन तत्रत्येन पत्रमुल्लिखितं द्राक्तरं यदत्रायातोऽस्मि, पितः! प्रेमवती च मया सार्धमेवात्र वर्तते भवन्तं च स्मरति, कदाचिदवकाशमादायात्रानुग्रहीतव्यावाम्। ततश्च केनचिदावश्यककार्येण द्राक्तश्चण्डीगढ़मभितस्थे तदा स कस्यचित् परिचितस्य द्विचक्रिकावाहने चण्डीमन्दिरमप्यगात्। तत्रायातमात्मपितृसदृशं द्राक्तरं तौ दम्पती परां मुदवाप्तवन्तौ। महाश्चादरो विहितस्तस्य। रात्रौ च सैनिकचत्रचित्रमपि तं दर्शितवन्तौ। तदानीं च प्रेमवती पुनरन्तर्वत्नी-भूतासीत् समयान्तरे पुत्ररत्नमेकमसूत सा। येन तस्यास्तत्परिवारे पूर्वं विलुप्तापि मानप्रतिष्ठा पुनरुद्बभौ। भूयश्च सा प्रेमवती पुत्रत्रयाणां जननी सम्भूता। यदा पप्पी च द्वादशकक्षामुत्तीर्णा तस्या विवाहोऽपि ताभ्यां महतोत्साहेन विहितः। द्राक्तरोऽपि तस्मिन् विवाहे निमन्त्रितस्ताभ्यां सोऽपि च तत्र गत्वा विपुलमादरमुपलब्धवान्। प्रबलवैभवौ तौ स्वकीयमेव निवासभवनं ग्रामाद् बहिः निर्मापयामासतुः। तयोश्च दाम्पत्य—जीवनमैश्वर्यसम्पनं स्नेहसिक्तञ्च विभाति स्म।

एकदा तत्र गतेन द्राक्तरेण सा प्रेमवती पृष्टा यत् पुत्रि! श्रावयात्मजीवनस्यावशिष्टान् क्लेशाध्यायान् ये पूर्वं त्वया कथयितुमाख्याता। इति श्रुत्वा विहसती प्रेमवती समुवाच—'गतास्ते दिवसा दुःखाध्यायाश्च भवदनुकम्पया' एषु सुखमयदिवसेषु स्मृतिपथमप्यायान्ति न इति पूर्वमुपलब्धमसुखञ्च विस्मृतवती प्रेमवती।

❁ समाप्ता कथा ❁

## गीतम्

## ❁ सखे! धन्येयं भारतभूः! ❁

—श्री रामविनयशास्त्री

काशीहिन्दूविश्वविद्यालयः वाराणसी, (उ०प्र०)

सखे! धन्येयं भारतभूः!
शब्दैराख्यातुं न शक्यते
अवनी वीरप्रसूः!

देवसेविता कम्या रम्या
नम्या वसुन्धरा,
क्रोडे क्रीडति सततं यासां
विद्या पराऽपरा,
आकृष्टा जाता पुराऽपि
किं सम्प्रति व्योमवधूः! ॥१॥

तपो वर्द्धिता तपोधनानां
सुममिव रजनीगन्धा,
राष्ट्रयज्ञरक्षायै निरता
सम्यक् कृतानुबन्धा,
देवो वर्षति त्यागसभामिह
असुवसुदेयं भूः! ॥२॥

दाने बलिदाने न काऽपि
भारतभूमेस्समता,
रागे र समरणेसा जाता
मानयुता ममता,
शौर्यं वीक्ष्य संयुगे मनसा
प्रणमति देवचमूः! ॥३॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# अध्यासविवेकेनैव ब्रह्मस्वरूपावधारणम्

—डॉ० रामप्रतापः तिवारी, अध्यक्षः संस्कृतविभागे
हेमवतीनन्दनबहुगुणागढ़वालविश्वविद्यालये, श्रीनगरम् (उ०प्र०)

'अहं ब्रह्मास्मि, तत्त्वमसि, सर्वं खल्विदं ब्रह्म, जीवो ब्रह्मैव नापरः, ब्रह्मसत्यं जगन्मिथ्या' इत्यादिवाक्यैर्ज्ञायते यद् ब्रह्मव्यतिरिक्तं नामरूपाभ्यां व्याकृतं जगद्रूपं न किञ्चिद् वस्तु विद्यते। किन्तु अस्माभिस्तु जगदेव दृश्यते यत्रास्माकं जन्मस्थितिर्विनाशाश्च जायन्ते। निर्विशेषाद्वैतवेदान्ते 'ब्रह्म सत्यं जगन्मिथ्या' इत्युच्यते। अत्र कस्मात् कारणाद् यद् दृश्यते तत्तु जगन्मिथ्या, यन्न दृश्यते तद् ब्रह्म सत्।

न ब्रह्म परोक्षम्, अहमस्मि इत्यनुभवात्। नास्ति ब्रह्मात्मनोः कोऽपि भेदः। यद् ब्रह्म द्रष्टुं न शक्नुमः तत्तु, अस्माकं हृदयस्थानेऽवतिष्ठते। यदा सर्वं खल्विवं ब्रह्मैव, ब्रह्म एव सत्यं जगन्मिथ्या तदा कस्माज्जगत्प्रतीतिर्जायते, ब्रह्म च कथं न सगुणरूपेण साक्षाद् द्रष्टुं शक्यते ?

अस्य प्रश्नस्य परिहारार्थम् 'अध्यासः' इति स्वीक्रियते। अध्यास-ज्ञानेन ब्रह्मस्वरूपमवगन्तुं शक्यते। तमेतमध्यासं पण्डिता अविद्येति मन्यन्ते। अविद्याकार्यत्वादेव अध्यासोऽपि अविद्या एव। तद् विवेकेन वस्तुस्वरूपावधारण विद्या। यथा रोगं ज्ञात्वा तस्य निवारण कर्तुं शक्यते, तथैव अध्यासस्य विवेकेन तस्य अध्यासस्य निवारणं कर्तुं शक्यते, तदा ब्रह्म एव सत्यं इत्यनुभूय ब्रह्म वेद ब्रह्मैव भवति।

ऋते ज्ञानान्न मुक्तिः। ज्ञानमेव विद्या। विद्यया एव मुक्तिर्जायते। अविद्यया तु ब्रह्मज्ञानं न जायते। अविद्यायाः अज्ञानस्यास्ति शक्तिद्वयम्— (१) आवरणशक्तिः। (२) विक्षेपशक्तिश्च। आवरणशक्त्या वस्तुस्वरूपमाच्छादयति, विक्षेपशक्त्या चावस्त्वारोपयति, तस्मान्न वस्तु द्रष्टुं शक्यतेऽवस्तु एव दृश्यते। मिथ्याज्ञानादेव ब्रह्मणि जगदारोप्यते, अतः ब्रह्म द्रष्टुं न शक्यते केवलं, जगदेव दृश्यते।

ब्रह्म एव नित्यं वस्तु। तस्य स्वरूपावधारणं विद्या। अध्यासस्य विवेकेनैव ब्रह्मस्वरूपावधारणं कर्तुं शक्यते। जन्ममृत्युभ्यां पीडितो मुमुक्षुर्यदा गुरूमुपगच्छति तदा स गुरुः परमकृपया तम् अध्यारोपापवादन्यायेन उपदिशति। अध्यारोप एव अध्यासः। अध्यास एव अविद्या, अध्यास एव अध्यारोपः, अध्यास एव भ्रान्तिः। यदा ब्रह्म सत्यं जगन्मिथ्या तदा ब्रह्म कथं न दृश्यते ? जगत्प्रतीतः कथं जायते ? अस्य जगतः प्रतीतिर्भ्रान्तिकारणात्। यथा भ्रान्त्या असर्पभूतायां रज्जौ सर्पस्य प्रतीतिर्जायते, एवं वस्तुनि ब्रह्मणि अवस्तु जगदारोप्यतेऽनादिनैसर्गिकाविद्याप्रभावात्। जगत्प्रभावात्मिथ्याज्ञानाच्च वयं ब्रह्मस्वरूपमवगन्तुं न शक्नुमः। वस्तुन्यवस्त्वारोप एवाध्यासोऽध्यारोपो वा। अध्यासस्य कारण मिथ्याज्ञानमेव। वस्तुन्यवस्त्वारोपोऽनादिरनन्तो नैसर्गिको लोकव्यवहारः। स्वभावतो वयमज्ञानान्धकारेणावृताः स्मः। अतः वयं ब्रह्म न पश्यामः, जगदेव सत्यमिति मन्यामहे। अविद्या



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एव मूलकारणम् अध्यासस्य ।

**अन्यदर्शनेष्वपि 'अविद्या' मन्यते–**

अविद्या एव दुःखस्य मूलकारणम् । चार्वाकदार्शनिकाः केवलं प्रत्यक्षमेव प्रमाणं मन्यन्ते । अनुमानादिप्रमाणैरुपलब्धं ज्ञानं मिथ्या एव । जैनदर्शने **'अज्ञानम्'** इति स्वीक्रियते । अज्ञानादेवानन्तरूपकस्य वस्तुनः स्वरूपं सर्वेऽवगन्तुं न शक्नुवन्ति । केवलं जिन एव जानाति सर्वम् । बौद्धदर्शने द्वादशनिदानसन्दर्भे दुःखस्य मूलकारणम् एव मन्यते ।

न्यायदर्शनेऽपि मिथ्याज्ञानं दुःखकारणमिति मन्यते । मिथ्याज्ञानापाये अपवर्गो जायते । यथा च न्यायसूत्रे —

**'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ।'**

— न्यायसूत्रम् २

अत्र अन्यथाख्यातिवादः स्वीक्रियते । ख्यातिः ज्ञानम् । यद् वस्तु यादृशं विद्यते, तस्य तादृशमेव ज्ञानं यथाख्यातिः । यदा अन्यरूपेण प्रतीयते, तदा अन्यथाख्यातिः । यथा यदि रज्जुर्रज्जुरूपेण प्रतीयते, तदा यथाख्यातिः । यदा रज्जुः सर्परूपेण वक्रतासादृश्यात् प्रतीयते तदा अन्यथाख्यातिः । रज्जौ सपप्रतीतिरन्यथाख्यातिर्मिथ्याज्ञानमित्यर्थः ।

सांख्यदर्शनेऽज्ञानं बुद्धेस्तामसरूपं मन्यते । अज्ञानादेव गुणकर्तृत्वेऽपि उदसीनः पुरुषः कतव भवति । अज्ञानेन बन्धः प्राप्यते ।[1] विपर्ययोः बुद्धिधर्मः । अविद्यास्मितारागद्वेषाभिनिवेशाः यथासंख्यं तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञकाः विपर्ययभेदाः ।[2] योगदर्शने विपर्ययस्तु चित्तवृत्तिरेव । विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठितम् । मुक्तयेऽस्य निरोधोऽनिवार्यः ।

मीमांसादर्शने अख्यातिवादः स्वीक्रियते । अत्र ज्ञानभेदाप्रतीतिः अख्यातिः । रज्जुज्ञानम् अन्यत्, सर्पज्ञानञ्चान्यत् । किन्तु रज्जौ सर्पस्य मिथ्याऽनुभूतिसमये रज्जुसर्पज्ञानयोर्भेदो न प्रतीयते । रज्जौ सर्पप्रतीतिर्जायते । सत्यं ज्ञानमनन्तं ब्रह्म । अखण्डं ब्रह्म । अखण्डमेव निर्विशेषम् । सजातीय–विजातीय–स्वगतभेदशून्यमित्यखण्डम् । तदेव ब्रह्म । ब्रह्म निर्विशेषम् । तस्य ब्रह्मणः स्वरूपनिर्धारणादयं निर्विशेषाद्वैतवादः ।

**अध्यासस्य विवेचनम्–**

ब्रह्मस्वरूपनिर्धारणाय अत्र **'अध्यासस्य'** विवेचनं क्रियते । कोऽयमध्यासः ? स्मृतिरूपः परत्रपूर्वदृष्टावभासः अध्यासः । अवभास इति पदस्य व्याख्या वाचस्पतिना कृता यद् अवसन्नोऽवमतो वा भासः अवभासः, मित्याज्ञानमित्यर्थः । स्मृतिरूपः=स्मृतेरूपमिव रूपं यस्य सः स्मृतिरूपः । यथा स्मृतौ स्मर्यमाणवस्तुसन्निहितं न वर्तते, केवलं तस्य ज्ञानं जायते । असन्निहित–विषयत्वं स्मृतत्वम् । परत्र, अन्यत्र पूर्वदृष्टस्यासन्निहितविषयस्य मिथ्याज्ञानमेव **'अध्यासः'** । अतस्मिंस्तद्बुद्धिरध्यासः । सर्वथा

---

१—सांख्यकारिकयां ४४ तमा कारिका
२—सांख्यकारिकायां ४७ तमा कारिका



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वन्यस्यान्यधर्माविभासतां न व्यभिचरति। वस्तुन्यवस्त्वारोपोऽध्यारोपः, तदेव अध्यासः।

सादृश्याभावेऽपि ब्रह्मणि जगत् कथमध्यस्यते ? रज्जौ सर्पारोपः सादृश्यादेव। रज्जुरपि सर्पवद् वक्रतामुपैति। वक्रता–सादृश्याद् रज्जा–वज्ञानवशात् सर्पस्य प्रतीतिर्भवति। चाकचिक्य-सादृश्यान्मिथ्याज्ञानाच्छुक्तौ रजतस्य अध्यासः सम्भवति किन्तु आत्मानात्मयोः किमपि सादृश्यं नास्ति। अतः कथमत्र अध्यासः ? परिहार एवं कृतः, यथा सादृश्यरहितेऽपि आकाशे बालास्तलमलिनतामारोपयन्ति एवं सादृश्यरहितेऽपि आत्मन्यनात्माऽध्यस्यते।

अध्यासे सत्यानृतयोर्मिथुनीकरणम्। कथं न सत्ययोः ? कथं नानृतयोर्मिथुनीकरणमध्यासे ? अत्र न द्वये सत्ये। ब्रह्मैव एकं सत्यम्। अतः सत्ययोर्मिथुनीकरणमसम्भवम्। अनृतयोर्मिथुनीकरणं न सम्भवति। उभयोरविद्यमानत्वात्। ब्रह्मणोऽपरोक्षानुभूतिः जायते अतः ब्रह्म सत्यम्। जगच्च पारमार्थिकरूपेणानृतम्। अतः सत्यानृतयोर्मिथुनीकरणं सम्भवति।

अध्यास—सत्तायां किं प्रमाणम् ? अयं सर्वलोकप्रत्यक्षः। अध्यासोऽनन्तो नैसर्गिको मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षोऽस्ति। अयं मिथ्याज्ञाननिमित्तो नैसर्गिको लोकव्यवहारः। एवमध्यासो निसर्गतः सिद्ध्यति।

**अध्यासस्य पर्यायाः –**

अध्यारोपः, विपर्ययः, मिथ्याज्ञानम्, मिथ्याप्रत्ययः, अन्यथाग्रहणम्, तमः, मोहः, माया, अविद्या इत्यादयः अध्यासस्य पर्यायाः सन्ति। अविद्यायाः मायायाः कार्यत्वादध्यासमविद्येति मन्यते।

**वेदान्तस्य परं प्रयोजनम् –**

वेदान्तशास्त्रस्य पर प्रयोजनम् अध्यास-निवृत्तिरेव। येन कस्मिंश्चित् कर्मणि प्रवृत्तिर्वा निवृत्तिर्वा जायते तदेव शास्त्रम्। यथा–अविद्याकल्पितभेदनिवृत्तिपरत्त्वाच्छास्त्रस्य।'[1] ब्रह्मवेदान्तशास्त्रेण एव अवगम्यते।

अस्यानर्थ-हेतोः प्रहाणायात्मैकत्वविद्या-प्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते[3]। मोक्षसाधनं शास्त्रं प्रणीयते। अध्यासस्य विवेकेन एव ब्रह्मज्ञानं जायते। न लौकिकाः जनसाधारणाः अध्यासमवगन्तुं शक्नुवन्ति।

**ब्रह्मज्ञानस्य कोऽधिकारी –**

अध्यासविवेकस्य ब्रह्मज्ञानस्य च कोऽधिकारी ? 'ब्रह्म सत्यं जगन्मिथ्या, जीवो ब्रह्मैव नापरः' इति ज्ञानं लौकिकाः प्राप्तुं न शक्नुवन्ति। अध्यासमवगन्तुं स एव अधिकारी येनास्मिन् जन्मनि जन्मान्तरे वा साङ्गवेदा अधीताः, सामान्यार्थाधिगताः। निर्मलस्वान्तः साधनचतुष्टयसम्पन्न एव अधिकारी अध्यास-विवेकस्य ब्रह्मज्ञानस्य च। नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेनाखिलकल्मषाः निर्ग–

---

१—ब्रह्मसूत्रशाङ्करभाष्यम् १/१/४
२— तत्रैव।
३— प्रश्नोपनिषद७/३ इत्यस्य अध्यासभाष्यम्।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्छन्ति। तस्मान्मनोऽतिनिर्मलं जायते। चित्तं चैकाग्रं जायते।

**साधनचतुष्टयम् –**

नित्यानित्य–वस्तुविवेकेहामुत्रार्थफलभोग–विराग–शमादिषट्कसम्पत्तिमुमुक्षुत्वानि साधन–चतुष्टयम्।

**नित्यानित्यवस्तुविवेक:**

ब्रह्मैव नित्यंवस्तु। तद् व्यतिरिक्तम-खिलाज्ञानादिजडसमूहोऽवस्तु इति।

**इहामुत्रार्थफलभोगविराग —**

इह लौकिकविषयभोगेभ्य: पारलौकिक–विषयभोगेभ्यश्च नितरां विरति: इहामुत्रार्थ–फलभोगविराग इति द्वितोयं साधनम्।

**शमादिषट्कसम्पत्ति: —**

श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रह: शम:। इन्द्रियाणां श्रवणादिव्यतिरिक्त-विषयेभ्यो निवॅतनं दम:। वेदनिषिद्धकर्मणां विधिना परित्याग उपरति:। शीतोष्णादिद्वन्द्व-सहिष्णुता तितिक्षा। निगृहीतं मन: श्रवणादौ तदनुगुणविषयेषु योजन समाधानम्। गुरुपदिष्ट-वेदान्तवाक्येषु विश्वास: श्रद्धा।

**मुमुक्षुत्वम्—**

मोक्षेच्छा मुमुक्षुत्वमस्ति।

एतेन साधनचतुष्टयेन सम्पन्न: निर्मल–स्वान्त एव अध्यासमवगन्तुं शक्यते। अध्या–सस्य विवेकेन ब्रह्मस्वरूपमवधार्य ब्रह्म एव भवति।

**अध्यासस्य मूलकारणम् –**

अध्यासस्य किं मूलकारणम्? अविद्या एव अध्यासस्य मूलकारणम्। तच्च नैसर्गिकम्। अविद्यायां निवृत्तौ अध्यासनिवृत्तिजायते। अध्यासे निवृत्ते ब्रह्मज्ञानं जायते। ब्रह्म वेद ब्रह्मैव भवति।

अविद्याया: निवृत्ति: कथं जायते? नितान्तनिर्मलस्वान्त: साधनचतुष्टयसम्पन्नो-ऽधिकारी ब्रह्मनिष्ठं गुरुमुपगच्छति। स: गुरु: **'तत्त्वमसि'** इति महावाक्येन तमुपदिशति। तत्त्वमसि इति वाक्यस्यार्थबोधेनाखण्डार्थेऽव–बोधितेऽधिकारी अहं ब्रह्मास्मि इत्यखण्डाकारा–कारिताचित्तवृत्तिरुदेति। बुद्धौ आत्मन: प्रति–बिम्बश्चिदाभास इत्युच्यते। इह जगति कस्य-चिद् वस्तुन: ज्ञानाय बुद्धिस्तत्स्थचिदाभासश्च उभौ ज्ञानेनेन्द्रियेण विषयं गच्छत:। तत्र च उभौ विषयाकाराकारितौ भवत:, इयमेव वृत्ति–व्याप्ति:। बुद्धि: विषयस्याज्ञानं नाशयति, आभासेन विषयो गृह्यते। आभासेन विषय-ग्रहणं फलव्याप्ति:।

ब्रह्मज्ञानाय वृत्तिव्याप्तिरपेक्षिता, फल-व्याप्तिर्नापेक्ष्यते। ब्रह्मज्ञाने बुद्धिस्तत्स्थचिदा-भास: उभौ ब्रह्मविषयं प्राप्य ब्रह्माकाराकारौ भवत:। बुद्धिर्ब्रह्मविषयकमज्ञानमपनयति, किन्तु ब्रह्म स्वयं प्रकाशमानमस्ति। अतस्तद् द्रष्टुं फलव्याप्तेरावश्यकता न वर्तते। यथा मेघ–पटलेऽपगते सूर्यं द्रष्टुं न किमप्यपेक्षते, एवं ब्रह्माज्ञानापगते ब्रह्म स्वयं प्रकाशमानत्वान्नान्येन साधनेन ज्ञातुमपेक्ष्यते। कदा अधिकारिणो बुद्धिस्तत्स्थाचिदाभासौ ब्रह्माकाराकारितौ भवत:? यदा समाधि: सिद्ध्यति। यदा समा-धेरष्टाङ्गानि ज्ञात्वा तदनुकूलमाचरणं क्रियते। यमनियमासनप्रणायामप्रात्याहारधारणाध्यान—समाधयोऽस्याङ्गानि।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहिंसासत्यास्तेयापरिग्रहब्रह्मचर्याः यमाः। शौचसन्तोषतपः —स्वाध्यायेश्वर— प्रणिधानानि नियमाः। करचरणादिसंस्थानविशेषलक्षणान्यासनानि। रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः। ज्ञानेन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः। अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा। तत्राद्वितीयवस्तुन्यन्तरिन्द्रियवृत्तेः विच्छिद्य प्रवाहो ध्यानम्। ज्ञातृज्ञानादिविकल्पलयानपेक्षयानयऽद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानं सविकल्पकः समाधिः। अत्र अहं ज्ञाता अस्मि, ब्रह्म ज्ञेयमस्ति, ज्ञानप्रक्रिया प्रवहति इति भानं भवत्येव। यथा मृण्मयगजादिभानेऽपि मृतिका एव सत्यम् इति ज्ञानं जायते। एवमत्र सविकल्पकसमाधौ द्वैतभानेऽपि अद्वैतं वस्तु ब्रह्म ज्ञायते।

निर्विकल्पकसमाधौ ज्ञातृज्ञेयज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकाकीभावेनावस्थानम् अस्मिन् समाधौ चित्तमेकाग्रं भवति। अखण्डाकाराकारिता चित्तवृत्तिर्ब्रह्मविषयीकृत्य तद्गताज्ञानमेव बाधते। अखिलकारणभूते अज्ञाने बाधिते सति तस्याखिलकार्यस्य बाधितत्वात् तदन्तर्भूताखण्डाकाराकारिता चित्तवृत्तिरपि बाधिता भवति।

तदा अधिकारी ब्रह्मणि साक्षात्कृतेऽज्ञानाद्यखिलजगत्कारणबाधितत्त्वात् निखिलबन्धरहितो जीवन्मुक्तः ब्रह्मनिष्ठः भवति। प्रारब्धकर्मणि समाप्ते स विदेहमुक्तो भवति। ब्रह्मज्ञानाय तस्य स्वरूपप्राप्तये च अज्ञाननिवृत्तिरनिवार्या। अज्ञाने निवृतेऽध्यस्ताः निवृताः भवन्ति, तदा अधिकारी ब्रह्मस्वरूपं ज्ञात्वा ब्रह्मैव भवति।

★

# ब्रह्मपुत्रं नमाम्यहम्

—डॉ० अनन्तराममिश्रः 'अनन्तः'
गोला गोकर्णनाथ, खीरी-२६२८०२ (उ०प्र०)

( १ )

साङ्पोमेघनायमुनासाँपूदिहाँग — संज्ञकम्।
लोहितगङ्गकं नित्यं ब्रह्मपुत्रं नमाम्यहम्॥

( २ )

अश्वमुखप्रवाहेण हिमानीसम्भवं शुचिम्।
मानसनन्दनं सौम्यं ब्रह्मपुत्रं नमाम्यहम्॥

( ३ )

शुभार्यं दक्षिणाङ्गेन वामाङ्गेन किरातकम्।
सुसमन्वयकं दिव्यं ब्रह्मपुत्रं नमाम्यहम्॥

( ४

महावेगं महाकारं महागाम्भीर्य—संयुतम्।
महाबाहुं च लौहित्यं ब्रह्मपुत्रं नमाम्यहम्॥

( ५ )

शाक्तवैष्णवशैवानां बौद्धपन्थानुयायिनाम्।
सौहार्दस्य दृढाधारं ब्रह्मपुत्रं नमाम्यहम्॥

( ६ )

वङ्गत्रिविष्टपप्रान्ते कामरूपेऽरुणाचले।
चारिणं बहुदेशीयं ब्रह्मपुत्रं नमाम्यहम्॥

( ७ )

नमस्यं जनश्रद्धेयं लोकगीतेषु चर्चितम्।
पौराणिकं नवीनञ्च ब्रह्मपुत्रं नमाम्यहम्॥

( ८ )

जलाकारं निराकारं नराकारं नदोत्तमम्।
नीराकार—परब्रह्म ब्रह्मपुत्रं नमाम्यहम्॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# कालिदासस्यायुर्वेदशास्त्रप्रावीण्यम्

—कुमारी वनज्योत्स्ना मिश्रा, शोधविभागः
श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठम्, पुरी (उड़ीसा)

सुविदितमेव संस्कृतवाङ्मय — प्रपञ्चे महाकवेः कालिदासस्य प्राशस्त्यम्। कविकुलगुरुरयं बहूनां काव्यानां रूपकाणाञ्च निर्माणेन समाजस्य साहित्यस्य च निरूपमां सेवामकार्षीत्।

महाकविरयं मेघदूत — ऋतुसंहार— कुमारसम्भव — रघुवंश — विक्रमोर्वशीय— मालविकाग्निमित्राभिज्ञानशाकुन्तलानां प्रणेता वर्तते। कविना स्वविरचितेषु उपर्युक्तेषु काव्येषु स्वीयम् आयुर्वेदशास्त्रप्रावीण्यं सुष्ठु प्रदर्शितम्। अतो कालिदासस्य रघुवंशाख्ये महाकाव्ये प्रतिपादितम् आयुर्वेदशास्त्रविज्ञानमधिकृत्यात्र किञ्चिदिव प्रस्तूयते।

चरकसंहितायां हंसोदकस्य महत्त्वमुद्दिश्योक्तं वर्तते[1]। निर्मलजलमेव हंसोदकमिति कथ्यते। हंसोदकं दिने सूर्यकिरणैरुष्णीकृतं भवति। रात्रौ च चन्द्रकिरणैः शीतलं भवति। समये पक्वम् अगस्त्यनक्षत्रेण शुद्धीकृतमेव निर्मलं जलं हंसोदकं भवति। इदं हि हसोदकं स्नानपानावगाहनक्रियार्थम् अमृततुल्यं भवति। कालिदासेनाप्यगस्त्य-नक्षत्रशुद्धीकृतजलस्योक्तं निर्मलत्वम्। तद्यथा —

**भ्रूभङ्गमात्रेण पदान्मघोनः**
**प्रशभ्रंया यो नहुशं चकार।**
**तस्याविलम्भः परिशुद्धिहेतो-**
**र्भौमो मुनेः स्थानपरिग्रहोऽयम्[2]॥**

महर्षेरगस्त्यस्य भ्रूभङ्गमात्रेण नहुषाख्यः इन्द्रपदात् प्रभ्रंशितः। तस्य मलिनजलशुद्धिप्रसादनिमित्तभूतस्य अगस्त्यस्य आश्रमोऽत्र विद्यते इत्यस्य श्लोकस्यार्थः। श्लोकेऽस्मिन् अगस्त्यो मलिनजलशुद्धिकर्तेति प्रतिपादितः। अन्यस्मिन्नपि श्लोके अगस्त्योदये जलं प्रसन्नं बभूवेति स्पष्टतया वर्तते[3]। चरकसंहितायां विषान्नयोर्विषयः सम्यग् विशदीकृतः। मद्यं विषञ्च युक्तिपूर्वकसेवनेनामृततुल्यौ भवतः। अमृतमपि युक्तायुक्तविचक्षणाशून्यं यद्यधिकं स्वीक्रियते, तर्हि विषतुल्यं भवति। तद्यथा—

**किन्तु मद्यं स्वभावेन यथैवान्नं तथा स्मृतम्।**
**अयुक्तिपूर्वं रोगाय युक्तियुक्तं यथामृतम्॥**

अपि च चरकसंहितायां प्रतिपादितम्—

---

1–चरकसंहिता (सूत्रस्थानम्) 6/47
2–रघुवंशः महाकाव्यम्—13/36
3–रघुवंशमहाकाव्यम्— 4/21



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

**प्राणाः प्राणभृतामन्नं तदयुक्त्या निहन्त्यसून् ।**
**विषं प्राणहरं तच्च युक्तियुक्तं रसायनम्[4] ॥**

रघुवंशमहाकाव्ये महाकविना कालिदासेनाप्येतदेवोक्तं वतते । तद्यथा —

**स्रागियं यदि जीवितापहा**
**हृदये किं निहिता न हन्ति माम् ।**
**विषमप्यमृतं क्वचिद् भवे-**
**दमृतं वा विषमीश्वरेच्छया[5] ॥**

अर्थात् इयं माला हृदये निहितापि कुतो मां न हन्ति ? विषमपि दैवेच्छया कदाचिदमृतं, अमृतमपि विषं भवति । इत्थमनेन कविना वैद्यशास्त्रविषया एव कदाचित्तात्त्विकदृष्ट्या प्रतिपादिताः । अरिष्टलक्षणयुतस्य मरणासन्नस्य रोगिणो चिकित्सा आयुर्वेदशास्त्रे निषिद्धा । यतो हि अपरस्मिन्नेव क्षणे दिवं गमिष्यत्ययं रोगीति जानन्नपि यदि वैद्यः चिकित्सां करोति, तर्हि अवश्यमेव लोकेऽपख्याति प्राप्स्यति । अत एवासन्नमरणस्य गतायुषोऽपि चिकित्सा आयुर्वेद-निषिद्धा । उक्तञ्च सुश्रुतसंहितायाम्—

**असिद्धिमाप्नुयाल्लोके प्रतिकुर्वन् गतायुषः ।**
**अतोऽरिष्टानि यत्नेन लक्षयेत् कुशलो भिषक्[6] ॥**

चरकसंहितायामपि निगदितं वर्तते । यथा—

**पादाः समेताश्चत्वारः सम्पन्नाः साधकैर्गुणैः ।**
**व्यर्था गतायुषो द्रव्यं विना नास्ति गुणोदयः[7] ॥**

महाकविना कालिदासेनापि रोगायुषो प्रतिकारं कर्तव्यमिति निगदितम् । तद्यथा —

**नृपतेर्व्यजदिभिस्तमो**
**नुनुदे सा तु तथैव संस्थिता ।**
**प्रतिकार — विधानमायुषो**
**सति शेषे हि फलाय कल्पते[8] ॥**

राज्ञोऽजस्याज्ञानं व्यजनादिभिस्साधनैरपाकृतम् । इन्दुमती तु तथैव मृता, यतो शेषायुषः एव चिकित्सा बलवती भवति, न तु गतायुथः । नृपतेरायुस्सद्भावात् प्रतिकारस्य साफल्यं तस्यास्तु तदभावात् वैफल्यमित्यर्थः । गर्भवती लक्षणकथनेनापि कवेरायुर्वेदविद्वत्ता प्रकटिता भवति । चरकसंहितायामित्थमुक्तं वर्तते—

'श्रद्धा प्रणयणोच्छ्वचेषु भावेषु चक्षुषो ग्लानिः स्तनमण्डलयोः काष्ण्यमत्यर्थम् । सा यद्यदृईच्छेत् तत् तस्यं दद्यात्[9] । कालिदासेनापि रघुवंशमहाकाव्ये इदमेवोल्लिखितं वर्तते । यथा–

---

4–चरकसंहितायाम् —24/59-60
5–रघुवंशमहाकाव्यम् —/646
6–सुश्रुतसंहिता (सूत्रस्थानम्) —28/7
7–चरकसंहितायाम् — 11/27
8–रघुवंशमहाकाव्ये —8/40
9–चरकसंहितायाम् —4/1



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरीरसादादसमग्रभूषणा
मुखेन सा लक्ष्यत लोध्रपाण्डुना।
तनुप्रकाशेन विचेयतारका
प्रभातकल्पा शशिनेव शर्वरी[10] ॥

पुनरपि महाकविना कालिदासेन कथितं यथा–

न मे ह्रिया शंसति किञ्चिदीप्सितं
स्पृहावती वस्तुषु केषु मागधी।
इति स्म पृच्छत्यनुवेलमादृतः
प्रियासखीरुत्तरकोशलेश्वरः[11] ॥

अर्थात् शरीरकार्ष्यात् असमग्रभूषणा सा पाण्डुना मुखेनोपलक्षिता सुदक्षिणा अल्पकान्तिना शशिनोपलक्षिता प्रभातकल्पा रात्रिरिवादृश्यत। लज्जया किमपेक्ष्यते तथेति न मां कथयति इति चिन्तयन् दिलीपः तस्यास्सखीः पृच्छति। रामोऽपि सीतायाः गर्भवत्याः ज्ञात्वेच्छां प्रेषयामास पुनर्वनम्। यथा—

तमङ्कमारोप्य कृषाङ्ग्यगिष्ट
वर्णान्तराक्रान्त — पयोधराग्राम्।
विलम्बमानां रहसि प्रतीपः
पप्रच्छ रामां रमणोऽभिलाषम्[12] ॥

श्लोकेऽस्मिन् गर्भवत्याः त्रीण्यपि लक्षणानि कथितानि सन्ति। अन्यच्च—

दिनेषु गच्छत्सु नितान्तपीवरं
तदीयमानीलमुखं स्तनद्वयम्।
तिरश्चकार भ्रमराभिनीलयो—
स्सुजातयोः पङ्कजकोषयो. श्रियम्[13] ॥

दोहद–दिनेषु गच्छत्सु सत्सु तस्याः पीनमानीलं स्तनद्वयं सुन्दरभ्रमराभिव्याप्तयोः पङ्कजकोषयोः श्रियं तिरश्चकार।

महाकविना वाग्भटेनाप्यष्टाङ्गहृदये कथितम्—

'आम्लेष्टता स्तनौ पीनौ
श्वतान्तौ कृष्णचूचुकौ।'

चरकसंहितायां क्षयरोगस्येतिहासः अत्रिपुत्रेणोक्तः। रोहिणीमत्यन्तं कामयमानेन चन्द्रेण दक्षशापवशात् क्षयरोगस्सम्प्राप्तः। महाकविना कालिदासेनास्याः कथायाः समुल्लेखः कृतः। अग्निवेशेनाप्यतिस्त्रीसम्भोगेनैव क्षयरोगसम्प्राप्तिस्सूचिता। महाकविना कालिदासेन विषयमिदं रघुवंशमहाकाव्यस्य १९ तमे सर्गे सुष्ठु वर्णितम्। यथा—

तं प्रसक्तमपि न प्रभावतः
शेकुराक्रमितुमन्यपार्थिवाः।
आमयस्तु रतिरागसम्भवो
दक्षशाप इव चन्द्रमक्षिणोत् ॥

---

10–रघुवंशमहाकाव्ये —3/2
11–रघुवंशमहाकाव्यम् —3/5
12–रघुवंशमहाकाव्यम् —14/27
13–रघुवंशमहाकाव्यम्



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृष्टदोषमपि तन्न सोऽत्यजत्
संगवस्तुभिषजामनाश्रवः ।
स्वादुभिस्तु विषयैर्हृतस्तो
दुःखमिन्द्रियगणो निवार्यते ॥

तस्य पाण्डुवदनाल्पभूषणा
सावलम्बगमना मृदुस्तना ।
राजयक्ष्मपरिहानिरायषौ
कामयानसमवस्थया तुलाम् ॥

व्योमपश्चिमकला — स्थितेन्दुना
पङ्कशेषमिव धर्मपल्लवम् ।
राज्ञि तत्कुलमभूत् क्षयातुरे
वामनार्चिरिव दीपभाजनम् ॥

स त्वनेकवनिता—सखोऽपि सन्
पावनीमनवलोक्य सन्ततिम् ।
वंद्ययत्नपरिभाविनं मदं
न प्रदीप इव वायुमत्यगात् ।

तं गृहोपवन एव संगताः
पश्चिमक्रतुविदा पुरोधसा ।
रोगशान्तिमुपदिश्य मन्त्रिणः
सम्भृते शिखिनि गूढमादधुः[14] ॥

अर्थात् व्यसनलोलमप्यग्निवेद्यम् अभिभवतुमन्यवार्थिवाः न शक्ताः । अतिरतिसम्भोगदोषात् तेन क्षयरोगो प्राप्तः । स वैद्यानां हितोक्तीर्न श्रुतवान् । तस्य भार्ययापि प्राप्तोऽयं रोगः । राज्ञि एवं क्षयातुरे सति रघुवंशः प्रतिदिनं क्षयो जातः । अग्निवेशः अनेकवनितावृतोऽपि सन्ततिं नालभत् । वायुवशाद् दीपः यथा न रक्ष्यते, तथैवायमपि क्षयरोगेणापरिमुक्तः । अत एव अन्त्येष्टिसंस्कारज्ञेन पुरोधसा समेताः मन्त्रिणः अग्निवेशं गूढमग्नौ निदधुः । क्षयरोगः पुनः सर्वत्र न प्रसरेदिति कामनया ।

चरकेऽपि वीर्यमहत्वकथनावसरे सम्युगक्तम्—

'यदा अतिकामेच्छया कोऽपि पुरुषः स्त्रिया सह सम्भोगसुखमनुभवति, तदा तस्य वीर्यक्षयो भवति । तथापि पुनरिच्छया यदि सः सम्भोगसुखमनुभवति, तदा तस्य वीर्यं न स्खलति । एतादृश्यामपि स्थित्यां यदि तस्य पुरुषस्य सम्भोगेच्छा भवति, तदा तस्य ध्रुवं मरणं सम्भवति ।' अत एव वीर्यस्याधिकंप्रामुख्यं विद्यते । चरकेऽपि द्रष्टव्यम्—

**आहारस्य परं धाम शुक्रं तद्रक्ष्यमात्मना ।**
**क्षयो ह्यस्य बहून् रोगान् मरणं वा नियच्छति ॥**[15]

अत एव **'मरणं बिन्दुपातेन जीवनं बिन्दुधारणात् ।'** इत्यप्युक्तम् । इत्थं महाकवेः कालिदासस्य रघुवंशमहाकाव्येऽऽयुर्वेदविज्ञानमत्र दिङ्मात्रं प्रदर्शितम् ।

---

14–रघुवंशमहाकाव्यम् — 19/48, 49, 50, 51, 53, 54
15–चरकसंहितायाम् — 6, 11



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# दिल्ली संस्कृत अकादमी, दिल्ली सरकार

पूर्व भारती महिला कालेज भवन, प्लाट नं० ५
झण्डेवालान, करोलबाग, नई दिल्ली–११०००५

## अखिल भारतीय संस्कृत लघु नाटक लेखन प्रतियोगिता १९९९-२०००

दिल्ली संस्कृत अकादमी अखिल भारतीय स्तर पर संस्कृत भाषा के लेखकों से संस्कृत की लघु नाटक लेखन प्रतियोगिता हेतु प्रविष्टियाँ आमन्त्रित करती है। जिसमें रु १०००/-, रु. ९००/- ,रु. ८००/-, रु. ७००/-, रु. ६००/-, रु. ५००/-, रु. ४००/-, रु. ३००/- के क्रमशः आठ पुरस्कार हैं। इसके अतिरिक्त रु. २००/- २००/- के छः पुरस्कार प्रदान किये जायेंगे। इन लघु नाटकों की प्रविष्टियों को अकादमी कार्यालय में जमा कराने की अन्तिम तिथि २०-१२-१९९९ है।

इस प्रतियोगिता में भाग लेने वाले व्यक्ति को लघु नाटक के कम से कम टंकित ४ पृष्ठ अकादमी में जमा करने होंगे। प्रस्तुत लघु नाटक राष्ट्र विरोधी तथा किसी के व्यक्तिगत जीवन पर आक्षेप करने वाला नहीं होना चाहिए। प्रत्येक प्रेषित नाटक में बालोपयोगी जीवन मूल्यों का समावेश होना आवश्यक है। अन्तिम तिथि के पश्चात् प्राप्त नाटकों पर किसी भी प्रकार विचार नहीं किया जायेगा।

( श्रीकृष्ण सेमवाल )
सचिव
दिल्ली संस्कृत अकादमी



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



# ※ सर्वं पश्यति प्रभुः ※

—श्रीकृष्णदत्तशर्मा शास्त्री
८१, जवाहर गंज, हापुड़-२४५१०१
गाजियाबाद (उ०प्र०)

एकस्मिन् महारण्ये कश्चिन् मेषपालपुत्र एकं विशालं मेषसमूहं संचारयन्नासीत्। तस्यायं जीवनक्रम एवासीत्। सः प्रातरेव समुत्थाय विभिन्नगृहेभ्य मेषा अजाश्च संहृत्य वनम् अनयत्। मेषस्वामिनस्तस्मै तत्कर्मप्रतिदाने धनमयच्छन्।

एकदा यदासौ बालकः समेषसमूहो वने आगात्, तदैको वृद्धो जनस्तद् वनमार्गेण क्वचिद् गच्छन्नासीत्। तेनासौ बालकः समेषसमूहो विलोकितः। तदवलोक्यासौ वृद्धमहाशयस्तत्रैव तस्थौ। बालकं समाहूय वृद्धस्तमप्राक्षीत्—

'भद्र बालक! किमिमा मेषास्त्वदीयाः?' 'न श्रीमन्! नेमा मदीयाः। अहं तु पशुचारकोऽस्मि।' बालक उदतरत्। 'प्रतिदानस्वरूपं किं लभ्यते?' वृद्धस्तं पुनरप्राक्षीत्। 'भोजनं वस्त्राणि च।' इति स प्रत्युदतरत्। 'केवलमेतन्मात्रमेव?' 'आम् श्रीमन्! स्वल्पतरमपि भवेत्तु करणीयमेव किमत्र?' बालकः सविनयमवादीत्।

'त्वमेतासु मेषासु केवलमेकामेव मूल्यमादाय मां प्रयच्छ, पर्याप्तं मूल्यं प्रदास्यामि। येन ते कुटुम्बागता दरिद्रता विनश्यति, इत्युक्त्वा वृद्धवेशधारी खलीफा उमरमहाभागस्तं परीक्षितुमैच्छत्।

'नैव श्रीमन्! नैव, नैता मेषा मदीयाः।' बालकः पुनः सुस्पष्टं प्रत्यवदत्। 'भद्र बालक! तव स्वामी त्वामवलोकयितुं नात्र समायाति। यदि प्रच्छेत्तु कथये यदेका मेषा वृकेन हतः खादितश्च' वृद्धेनासावुपदिष्टः।

हरिद्वारस्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्
भारतोदयः संस्कृतमासिकम्
पत्रालयः गुरुकुलमहाविद्यालयः—२४९४०५
हरिद्वारम् (उ०प्र०)

सेवायाम्,
श्री...
२५० श्री पुस्तकालयाध्यक्ष
वाल्मीकि संस्कृत विद्यापीठ
प्रदर्शनी मार्ग,
काठमाण्डू (नेपाल)

'श्रीमन्! नात्र मे स्वामी मां पश्यति, परन्तु सर्वसमर्थो जगत् पिता तु पश्यत्येव। सांसारिको जनस्तु केनापि वञ्चितो भवितुं शक्यते, परन्तु तं जगतः स्वामिनं कोऽपि वञ्चयितुं न समर्थः। जगन्नियता सर्वं पश्यति।' बालकोऽवदत्।

प्रच्छन्नरूपो वृद्धमहाभागः स्वरूपं गोप्तुं न शशाक। अहमस्मि 'खलीफा उमर' इत्यभिधाय तं बालकं झटिति स्वाङ्के निधाय प्रेम्णा निजगाद— 'वत्स! त्वादृशान् नागरिकान् अवाप्याहं धन्योऽस्मि।' 'खलीफा उमर' महाभागस्तं बालकं प्रचुरार्थदानेन सभाजयामास। वस्तुतो यद्यपि जनः किमपि कर्तुं साधिकारो वर्तते, परन्तु तस्य कर्तव्यभावना तं सदैव सत्कार्यायैव प्रेरयति।

मुद्रकेन, प्रकाशकेन डा० हरिगोपालशास्त्रिणा ज्वालापुरीये 'अनुभव प्रिंटिंग प्रेस' मुद्रणालये मुद्रापयित्वा 'भारतोदयः' मासिकं मुखपत्रं प्राकाश्यतां नीतं हरिद्वारस्थितया ज्वालापुरीय गुरुकुलमहाविद्यालयसभया।
सम्पादकः डॉ० हरिगोपालशास्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu